श्री विष्णु स्तोत्रं (संकष्टनाशनं)

श्री विष्णु स्तोत्रं (संकष्टनाशनं)

नारद उवाच |
पुनर्दैत्यं समायांतं दृष्ट्वा देवाः सवासवाः |
भयप्रकंपिताः सर्वे विष्णुं स्तोतुं प्रचक्रमुः || 1 ||

देवा ऊचुः |
नमो मत्स्यकूर्मादिनानास्वरूपैः
सदा भक्तकार्योद्यतायाऽऽर्तिहंत्रे |
विधात्रादि सर्गस्थितिध्वंसकर्त्रे
गदाशंखपद्मारिहस्ताय तेऽस्तु || 2 ||

रमावल्लभायाऽसुराणां निहंत्रे
भुजंगारियानाय पीतांबराय |
मखादिक्रियापाककर्त्रे विकर्त्रे
शरण्याय तस्मै नताः स्मो नताः स्मः || 3 ||

नमो दैत्यसंतापितामर्त्यदुःखा-
-चलध्वंसदंभोलये विष्णवे ते |
भुजंगेशतल्पेशयानाऽर्कचंद्र-
-द्विनेत्राय तस्मै नताः स्मो नताः स्मः || 4 ||

नारद उवाच |
संकष्टनाशनं नाम स्तोत्रमेतत् पठेन्नरः |
स कदाचिन्न संकष्टैः पीड्यते कृपया हरेः || 5 ||

इति स्कांदपुराणे द्वितीये वैष्णवखंडे कार्तीकमासमाहात्म्ये षोडशोऽध्याये संकष्टनाशन श्री विष्णु स्तोत्रं |